# केन्द्रीयसंस्कृतविश्वविद्यालयः

जनकपुरी, नवदेहली

# सरलसंस्कृतेन

# सङ्क्षेपग्रन्थहारः (सङ्ग्रहः)

**सम्पर्कः**- +91 9449103568 **अणुसङ्केतः** res-pub@csu.co.in **जालपुटम्**-https://csu.co.in/samgrahah/

==================================================================

## नियमावलिः*

**सामान्यानियमाः -**

1. नामूलं लिख्यते किंचित् नानपेक्षितमुच्यते इति भावः लेखके स्यात्।
2. लेखकेन बौद्धिकश्रममात्रं करणीयम्। मुद्रणप्रकाशनादीनां व्ययं विश्वविद्यालयः एव वहति।
3. पुस्तकस्थपङ्क्तयः / जालपुटस्थानि वाक्यानि वा यथावत् नैव योजनीयानि/ स्थापनीयानि। अनुकृतिः न अनुमन्यते।
4. ग्रन्थस्य अन्ते परिशीलितग्रन्थानां जालस्थानानां च वस्तुनिष्ठसूची योजनीया।
5. अपूर्णः प्रागेव प्रकाशितः विषयः पुनः नैव स्वीकर्तव्यः।
6. भाषा सरला सामान्यजनसुबोधा शुद्धा च भवेत्।
7. ग्रन्थः सङ्ग्रहात्मकः सर्जनात्मकः सरलसंस्कृतेन च लिखितः भवेदेव।

==================================================================

### १. योजनापरिचयः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रकाशनविभागेन विभिन्नाः विशिष्टाः नव्याश्च प्रकाशनयोजनाः माननीयकुलपतीनां संसूचनानुगुणं समारभ्यन्ते। तत्र ' सङ्क्षेपग्रन्थहारः - सङ्ग्रहः ' इति संस्कृतवाङ्मयप्रवेशयोग्या निर्दिष्टसमयसाध्या योजना अपि अन्यतमा । ' सरलसंस्कृतेन सङ्क्षेपग्रन्थहारः - सङ्ग्रहः ' इत्यस्याः योजनायाः उद्देश्यं वर्तते यत् लब्धावसाराः बालाः सङ्ग्रहेण सरलशैल्या च युवसंस्कृतलेखकैः सरलसंस्कृतेन लिखितानां विभिन्नतत्त्वविषयकाणां लघ्वाकारकग्रन्थानां (4 ×7) पठनपुरस्सरं संस्कृतवाङ्मये प्रवेष्टुं समुत्सुकाः भवेयुः इति।

### २. लेखकः कः भवितुमर्हति?

- प्राध्यापकाः (आचार्य-सहाचार्य-सहायकाचार्यादयः)
- शोधच्छात्रः
- संस्कृतकार्यकर्तारः
- वरिष्ठच्छात्राः

**३. कालावधिः प्रक्रिया च**

| | |
|---|---|
| • आन् लाइन्- आवेदनप्रारम्भः- | 26.01.2023 |
| • आन् लाइन्-आवेदनम्-- | आवर्षम् |
| • लेखकानां कृते निर्देशः आन् लाइन्-उपवेशनम् | 01.05.2023 |
| • प्रारूपप्रेषणम् (Book Module for review) | 20.05.2023 (लिंक मेलमाध्यमेन यथासमयं प्रेष्यते।) |
| • लेखनार्थमनुमतिप्रदानम्- | 30.05.2023 |
| • ग्रन्थलेखनम्- | 01.06.2023-30.07.2023 |
| • सम्पादनम्/प्रकाशनम्- | 01.8.2023-31.08.2023 |
| • ग्रन्थस्वीकरणम्- | 31.09.2023 |

**ग्रन्थलेखनमनेन प्रकारेण भवेत्**

- प्रकृतग्रन्थशीर्षकस्य अर्थः , व्युत्पत्तिः, निर्वचनम् , परिभाषाः च
- विषयस्य पीठिका महत्वं च
- भेदाः, गुणलक्षणानि
- महत्वं सामयिकोपयोगिता च
- विषयविशेषे अग्रिमाध्ययनस्थानानि उपसंहारश्च
- परिशीलितग्रन्थसूची जालस्थानसूची

**४. कीदृशी भाषा**

- भाषा सरला सामान्यजनसुबोधा शुद्धा च भवेत् ।

**५. प्रबन्धस्य सामान्यतः स्वरूपम्**

एतत्कार्यसम्पादनाय संस्कृतवाङ्मयस्य विभिन्नानि विद्यास्थानानि लेखकानां सौकर्याय प्रकल्पितानि सन्ति।लेखनोट्टङ्कनादिकं कृत्वा त्रुटिसंशोधनं च सम्पाद्य लेखकाः word file रूपेण लिखितसामग्रीं मुख्यालयस्य प्रकाशनविभागं प्रति प्रेषयेयुः । ७० तः १०० पुटात्मकस्य लघुग्रन्थस्य पुस्तकस्य वा परिकल्पनं कृत्वा ( 4×7) मानकस्वरूपमवगम्य यथाशीघ्रं स्वाभीष्टात् विद्यास्थानात् एकं विषयं चित्वा पुस्तकं विलिख्य उट्टङ्कनादिकं कृत्वैव प्रेषयेयुः।

| | |
|---|---|
| • ग्रन्थस्य आकारः | 4X7 (लघ्वाकारकः ग्रन्थः) |
| • पुटानि | 70-100 |
| • Font Type | Unicode |
| • Font | Mangal/Sanskrit Text/Kokila/Arial Unicode MS |
| • Font Size | 12 (Title-16, Sub-Title-14) |
| • Line Spacing | 1.5 |
| • File Type | Word file |
| • Reference Style | APA/MLA/Chicago |

**६. शोधनं सम्पादनं च**

- प्रधानसम्पादकः- माननीयाः कुलपतयः
- तैः अनुमोदिताः  सम्पादनं करिष्यन्ति।

**७. मानदेयम्**

- कार्यक्रमप्रकाशनविभागात् समीक्षणात् परं संशोधितस्य/परिष्कृतस्य ग्रन्थस्य कृते समुचितं मानदेयम् अपि दीयते।
- प्रकाशनानन्तरं ग्रन्थस्य सम्मानप्रतयः अपि दीयन्ते।

**८. प्रकाशनाय सिद्धता**

लिखितसामग्र्याः भाषा शैली प्रस्तुतीकरणम् उपादेयता आकर्षकता इत्यादिकं समीक्षकसमितिः परिशीलयति। ततः अनुमोदितानामेव प्रकाशनं विश्वविद्यालयस्य पक्षतः भविष्यति। सर्वाधिकारः विश्वविद्यालयस्य एव भवति इति लेखकैः विज्ञेयम् ।

- मुद्रणं प्रकाशनं  लोकार्पणादिभिः सम्बद्धः सर्वाधिकारः विश्वविद्यालयस्यैव भविष्यति।
- विश्वविद्यालयनियमानुगुणं प्रकाश्यते

**९. आन्-लाइन् आवेदनम्**

- आनलाइन- अधिसूचनानुगुणम् आवर्षम् आवेदनं विधेयम्।

**१०. विषयसूची** (केवलं दिग्दर्शनाय । विज्ञानादिसम्बद्धाः विषया अपि स्वीकर्तुं शक्याः।)

- वेद-वेदाङ्गपरिचयः
- शिक्षा
- व्याकरणम्
- छन्दः
- निरुक्तम्
- ज्यौतिषम्
- कल्पः
- सर्वदर्शनम् ( सामान्यपरिचयः)
- साङ्ख्यदर्शनम् - प्रकृतिः, पुरुषः , पञ्चविंशतितत्त्वानि।
- योगदर्शनम् ( यमनियमादिषु एकैकः कोऽपि अभीष्टः)
- वैशेषिकदर्शनम् -  पदार्थाः, प्रमाणानि , हेत्वाभासः , काणादं पाणिनीयं च , सूत्रम्, वार्तिकम् , भाष्यम् , शाब्दबोधः।
- न्यायदर्शनम् - पञ्चावयवम् , ईश्वरः, उदयनः , गदाधरः , गङ्गेशः पदार्थाः, प्रमाणानि , हेत्वाभासः , अनुमानम् ,  सूत्रम्, वार्तिकम् , भाष्यम् , शाब्दबोधः , प्रथमान्तार्थः इत्यादयः।

- पूर्वमीमांसा - स्वर्गः , मोक्षः , अपौरुषेयं वाक्यम् , भावना , धर्मः , यागः , कर्ममीमांसा
- उत्तरमीमांसा - ज्ञानम् , मोक्षः , आत्मा , प्रकृतिः, मायावादः , जीवः , जगत्, भक्तिः , कर्ममार्गः, उपनिषत्, ब्रह्मसूत्राणि, भाष्यम्, वार्तिकम्।
- नास्तिकदर्शनानि - चार्वाकवादः, बौद्धवादः , जैनवादः, संसारः, सुखम् , दुःखम्
- ज्योतिश्शास्त्रम् - पञ्चाङ्गपरिचयः , पञ्चाङ्गनिर्माणविधिः, दशा , गोचरफलम् , संस्कारमुहूर्तः , अधिमासः , क्षयमासः , गृहवास्तु , तारानुकूलविचारः , प्रश्नशास्त्रपरिचयः, ग्रहणम् इत्यादयः।
- साहित्यम् - काव्यम् , ध्वनिः , शब्दालङ्कारः , अर्थालङ्कारः , कालिदासः, नाटकम् , रूपकाणि , औचित्यम्, रसः , नाट्यकलाः , गद्यम्, पद्यम्, चम्पू , रीतिः, काव्यगुणाः, काव्यशास्त्रविनोदः इत्यादयः।
- धर्मशास्त्रम् - आचारः , व्यवहारः , प्रायश्चित्तम्, स्मृतयः , संस्कारः इत्यादयः।
- पुराणेतिहासः - महाभारतम् , रामायणम् , पुराणम्, व्यासः , भागवतम् , शान्तिपर्व , भीष्मपर्व इत्यादयः।
- व्याकरणम् - सूत्राणि , भाष्यम् , वार्तिकम् , पाणिनिः, पतञ्जलिः, वररुचिः, नागेशभट्टः , भर्तृहरिः , महाभाष्यम् , व्याकरणांशः
- शिक्षाशास्त्रम् - शिक्षा , शिक्षणम् , प्रशिक्षणम् , मनोविज्ञानम्, प्रौद्योगिकी, शिक्षादर्शनम् , समाजशास्त्रम्

* एकरूपतानयनविषयकाः अविशिष्टाः सर्वेऽपि नियमाः काले-काले सङ्क्षेपग्रन्थहारनामके व्हाट्स-एप-समूहे प्रसार्यन्ते।

## मार्गदर्शनम्

**आचार्यः श्रीनिवासः वरखेडी**

माननीयः कुलपतिः

| | |
|---|---|
| निवेदकः | संयोजकः |
| **डा. मधुकेश्वरभट्टः** | **डा. गणेश ति. पण्डितः** |
| निदेशकः | सहायकनिदेशकः |
| कार्यक्रम-प्रकाशनविभागे | कार्यक्रम-प्रकाशनविभागे |